# Kodandapani Stotram

# કોદણ્ડપાણિસ્તોત્રમ્

## Document Information

Text title : Kodandapani Stotram

File name : kodaNDapANistotraM.itx

Category : vishhnu, stotra, dashaka

Location : doc_vishhnu

Author : (ashoka) raghunAthAchArya

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# કોદણ્ડપાણિસ્તોત્રમ્

સાકેતપુર્યાં નિવહં જનાનામાનન્દયન્ કૌશિકયજ્ઞપાલઃ ।
પાદેન પુણ્યાં કલયન્નહલ્યાં કોદણ્ડપાણિઃ કુલદૈવતં નઃ ॥ ૧॥

ચાપં ચ ભઙ્ક્ત્વા વસુધાતનૂજાં જાયામવાપ્યાથ ભૃગોઃ કુમારમ્ ।
નિરોધયન્ પ્રાપ્તનિજાધિવાસઃ કોદણ્ડપાણિઃ કુલદૈવતં નઃ ॥ ૨॥

લોકપ્રિયઃ કેકયરાજપુત્ર્યાઃ પ્રીતિં ચિકીર્ષન્ સહ લક્ષ્મણેન ।
સીતાં પુરસ્કૃત્ય વનં પ્રવિષ્ટઃ કોદણ્ડપાણિઃ કુલદૈવતં નઃ ॥ ૩॥

યો દણ્ડકારણ્યનિશાચરેન્દ્રાન્ કોદણ્ડલીલાવિષયીચકાર ।
વેતણ્ડશુણ્ડાયતબાહુદણ્ડઃ કોદણ્ડપાણિઃ કુલદૈવતં નઃ ॥ ૪॥

વિયુક્તસીતો વિગતસ્પૃહોઽપિ લાલપ્ય સંસ્કૃત્ય વિહઙ્ગવીરમ્ ।
મિત્રં ચ વિજ્ઞાય સુહૃત્કબન્ધાત્ કોદણ્ડપાણિઃ કુલદૈવતં નઃ ॥ ૫॥

અપાર્યદુઃખં વિનિવાર્ય યત્નાત્ સ્વવીર્યનિર્યાપિતવાલિવૈરી ।
વિતીર્ય રાજ્યં કપયેઽગવાસઃ કોદણ્ડપાણિઃ કુલદૈવતં નઃ ॥ ૬॥

સંસ્થાપિતાશેષકપીન્દ્રમુખ્યસ્તીર્ણામ્બુધૈર્વાયુસુતાત્ સમસ્તમ્ ।
વિજ્ઞાય વેલાસુ નિવિષ્ટસેનઃ કોદણ્ડપાણિઃ કુલદૈવતં નઃ ॥ ૭॥

વિભીષણાયાર્પિતરાવણશ્રીર્નલેન સેતું વિરચય્ય ચાબ્ધૌ ।
બલેન લઙ્કાં જ્વલયન્ ચિરૌઘૈઃ કોદણ્ડપાણિઃ કુલદૈવતં નઃ ॥ ૮॥

સેનાભિરાહત્ય ચ યાતુધાનાનિન્દ્રારિમુખ્યાન્ સહ લક્ષ્મણેન ।
સ્વબાણનિર્ભિન્નદશાનનાદ્રિઃ કોદણ્ડપાણિઃ કુલદૈવતં નઃ ॥ ૯॥

સંશોધયન્ ભૂમિસુતાં હુતાશાત્ સઞ્જીવયન્ સર્વહરીનયોધ્યામ્ ।
પ્રવિશ્ય ચાસાદિતપટ્ટબન્ધઃ કોદણ્ડપાણિઃ કુલદૈવતં નઃ ॥ ૧૦॥

ઇતિ શ્રી (અશોક) રઘુનાથાચાર્યેણ વિરચિતં શ્રીકોદણ્ડપાણિસ્તોત્રં સમ્પૂર્ણમ્ ।
સ્તોત્રસમુચ્ચયઃ ૨ (૫૪)

Proofread by Rajesh Thyagarajan

*Kodandapani Stotram*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*